तेऽपि यान्ति परं स्थानं नारायणपरायणाः ॥
दृढ़ा जनार्द्दने भक्तिर्यदैवाव्यभिचारिणी ।
तदा कियत् स्वर्गसुखं सैव निर्व्वाणहेतुकी ॥
भ्राम्यतां तत्र संसारे नराणां कर्म्मदुर्गमे ।
हस्तावलम्बनो ह्येको भक्तितुष्टो जनार्द्दनः ॥
न शृणोति गुणान् दिव्यान् देवदेवस्य चक्रिणः ।
स नरो बधिरो ज्ञेयः सर्व्वधर्म्मबहिष्कृतः ॥
नाम्नि संकीर्त्तिते विष्णोर्यस्य पुंसो न जायते ।
शरीरं पुलकोद्भासि तद्भवेत् कुणपोपमम् ॥
यस्मिन् स्तुते द्विजश्रेष्ठ मुक्तिरप्यचिराद्भवेत् ।
विष्णौ निविष्टमनसां किं पुनर्वृजिनक्षयः ॥
स्वपुरुषमभिवीक्ष्य पाशहस्तं
वदति यमः किल तस्य कर्णमूले ।
परिहर मधुसूदनप्रपन्नान्
प्रभुरहमन्यनृणां न वैष्णवानाम् ॥
अपि चेत् सुदुराचारो भजते मामनन्यभाक् ।
साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः ॥
क्षिप्रं भवति धर्म्मात्मा शश्वच्छान्तिं नियच्छति ।
विप्रेन्द्र प्रतिजानीहि विष्णुभक्तो न नश्यति ॥
धर्म्मार्थकामैः किन्तस्य मुक्तिस्तस्य करे स्थिता ।
समस्तजगतां मूले यस्य भक्तिः स्थिरा हरौ ॥
दैवी ह्येषा गुणमयी हरेर्म्माया दुरत्यया ।
तमेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥
कियदाराधने पुंसामिष्यते हरिमेधसः ।
भक्त्यैवाराध्यते विष्णुर्नान्यत्तत्तोषकारणम् ॥
न दानैर्विविधैर्दत्तैर्न पुष्पैर्नानुलेपनैः ।
तोषमेति महात्मासौ यथा भक्त्या जनार्द्दनः ॥
संसारविषवृक्षस्य द्वे फले ह्यमृतोपमे ।
कदाचित् केशवे भक्तिस्तद्भक्तैर्व्वा समागमः ॥
पत्रेषु पुष्पेषु फलेषु तोये-
ष्वकष्टलभ्येषु सदैव सत्सु ।
भक्त्येकलभ्ये पुरुषे पुराणे
मुक्त्यै कथं न क्रियते प्रयत्नः ॥
आस्फोटयन्ति पितरः प्रनृत्यन्ति पितामहाः ।
वैष्णवोऽस्मत्कुले जातः स नः सन्तारयिष्यति ॥
अज्ञानिनः सुरवरं समधिक्षिपन्ति
ये पापिनोऽपि शिशुपालसुयोधनाद्याः ।
मुक्तिं गताः स्मरणमात्रविधूतपापाः
कः संशयः परमभक्तिमतां जनानाम् ॥
शरणं तं प्रपन्ना ये ध्यानयोगविवर्ज्जिताः ।
तेऽपि मृत्युमतिक्रम्य यान्ति तद्वैष्णवं पदम् ॥
भवोद्भवक्लेशशताहतस्तथा
परिभ्रमन्निन्द्रियवन्धकैः पथैः ।
नियम्यतां माधव मे मनोहय-
स्त्वदङ्घ्रिशङ्कौ दृढ़भक्तिबन्धने ॥
विष्णुरेव परं ब्रह्म त्वभेदमिह पठ्यते ।
वेदसिद्धान्तमार्गेषु तं न जानन्ति मोहिताः ॥
वसति हृदि सनातने च तस्मिन्
भवति पुमान् जगतोऽस्य सौम्यरूपः ।
क्षितिवसनमतिरम्यमात्मनोऽन्तः
कथयति चारुतयैव मानपतेः ॥"
इति गारुड़े २३१ अध्यायः ॥

विष्णुमाया, स्त्री, (विष्णोर्माया ।) दुर्गा । यथा,—
नारद उवाच ।
"दुर्गा नारायणीशाना विष्णुमाया शिवा सती ।
नित्या सत्या भगवती सर्व्वाणी सर्व्वमङ्गला ॥
अम्बिका वैष्णवी गौरी पार्व्वती च सनातनी ।
नामानि कौथुमोक्तानि शुभानि शुभदानि च ॥
अर्थं षोड़शनाम्नाञ्च सर्व्वेषामीप्सितं वरम् ।
ब्रूहि वेदविदां श्रेष्ठ वेदोक्तं सर्व्वसम्मतम् ॥
नारायण उवाच ।
सृष्टा माया पुरा सृष्टौ विष्णुना परमात्मना ।
मोहितं मायया विश्वं विष्णुमाया च
कीर्त्तिता ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५४ अध्यायः ॥
अपि च ।
ब्रह्मोवाच ।
"विष्णुमायान्त्वमिच्छ महामायां जगन्मयीम् ।
नान्या संमोहकर्त्री स्यात् सन्ध्या सावित्र्यु-
पासिका ॥
तस्मादहं विष्णुमायां योगनिद्रां जगत्प्रसूम् ।
स्तौमि सा चारुरूपेण शङ्करं मोहयिष्यति ॥
भवांश्च दक्ष तामेव यजतां विश्वरूपिणीम् ।
यथा तव सुता भूत्वा हरजाया भविष्यति ॥"
इति कालिकापुराणे ५ अध्यायः ॥

विष्णुयशाः, [स्] पुं, (विष्णु व्यापकं यशो यस्य । नारायणपितृत्वादेवास्य तथात्वम् । यद्वा, विष्णुना गृहीतजन्मना यशो यस्य ।) ब्रह्मयशःपुत्रः । स च कल्किपिता । यथा,—
नारद उवाच ।
"अहो बलवती माया सर्व्वाश्चर्य्यमयी शुभा ।
पितरं मातरं विष्णोर्नैव मुञ्चति कर्हिचित् ॥
पूर्णो नारायणो यस्य सुतः कल्किर्जगत्पतिः ।
तं विहाय विष्णुयशा मत्तो मुक्तिमभीप्सति ॥
विविच्येत्थं ब्रह्मसुतः प्राह ब्रह्मयशःसुतम् ।
विविक्ते विष्णुयशसं ब्रह्मसम्पद्विवर्द्धनम् ॥"
इति कल्किपुराणे ३० अध्यायः ॥

विष्णुरथः, पुं, (विष्णो रथः ।) गरुड़ः । इत्यमरः ॥ विष्णोः स्यन्दनञ्च ॥

विष्णुरातः, पुं, (विष्णुना रातो रक्षितः ।) परीक्षिद्राजः । यथा,—
"दैवेनाप्रतिघातेन शुक्ले संस्थामुपेयुषि ।
रातो वोऽनुग्रहार्थाय विष्णुना प्रभविष्णुना ॥
तस्मान्नाम्ना विष्णुरातो लोके ख्यातिं गमिष्यति ।
न सन्देहो महाभाग महाभागवतो महान् ॥"
इति श्रीभागवते १ स्कन्धे १२ अध्यायः ॥

विष्णुलिङ्गी, स्त्री, वर्त्तिकापक्षी । इति त्रिकाण्डशेषः ॥

विष्णुवल्लभा, स्त्री, (विष्णोर्व्वल्लभा ।) तुलसी । इति राजनिर्घण्टः ॥ लक्ष्मीः । यथा,—
"त्रैलोक्यपूजिते मातः कमले विष्णुवल्लभे ।
यथा त्वमचला कृष्णे तथा भव मयि स्थिरा ॥"
इति तन्त्रसारः ॥
अग्निशिखावृक्षः । इति शब्दचन्द्रिका ॥

विष्णुवाहनं, क्ली, (विष्णोर्व्वाहनम् ।) गरुड़ः । इति हेमचन्द्रः । २ । १४४ ॥

विष्णुवाह्यः, पुं, (विष्णुर्व्वाह्यो येन ।) गरुड़ः । इति शब्दरत्नावली ॥

विष्णुशिला, स्त्री, (विष्णुनाधिष्ठिता शिला ।) शालग्रामशिला । कलौ तस्य स्थितिकालो यथा,—
"अयुताब्दे कलेर्याते त्यजेद्विष्णुशिला महीम् ।
तदर्द्धाज्जाह्नवीतोयं तदर्द्धाद्देवताशिला ॥"
इति मेरुतन्त्रे ५ प्रकाशः ॥

विष्णुशृङ्खलः, पुं, योगविशेषः । यथा, मात्स्ये ।
"द्वादशी श्रवणस्पृष्टा स्पृशेदेकादशीं यदा ।
स एष वैष्णवो योगो विष्णुशृङ्खलसंज्ञितः ॥
तस्मिन्नुपोष्य विधिवन्नरः सङ्क्षीणकल्मषः ।
प्राप्नोत्यनुत्तमां सिद्धिं पुनरावृत्तिदुर्ल्लभाम् ॥"
इति ॥
विष्णुधर्म्मोत्तरे द्वितीयविष्णुशृङ्खलयोगमाह ।
"एकादशी द्वादशी च वैष्णव्यमपि भं भवेत् ।
तद्विष्णुशृङ्खलं नाम विष्णुसायुज्यकृद्भवेत् ।
तस्मिन्नुपोषणाद्गच्छेच्छ्वेतद्वीपपुरं ध्रुवम् ॥"
इति श्रीहरिभक्तिविलासे १५ विलासः ॥

विष्फारः, पुं, (वि + स्फुर स्फुरणे + घञ् । "स्फुरति-स्फुलत्योर्घञि ।" ६।१।४७। इत्यात्वम् । "स्फुरति स्फुलत्योर्निर्निविभ्यः ।" ८।३।७६। इति षत्वञ्च ।) धनुर्गुणशब्दः । इत्यमरः ॥ धनुर्गुणस्य स्वानष्टङ्कारो विष्फारः । स्फुर शि च स्फूर्त्तौ घञि घञस्य दैधावोदेति निपातः । किंवा स्फुरधातो रूपं विष्कभ्नेत्यादिना पाक्षिकषत्वात् विष्फारो इत्यसौ मूर्द्धन्यषश्च । इति भरतः ॥

विष्यः, त्रि, (विषेण वध्यः । विष + "नौवयोधर्म्मेति ।" ४ । ४ । ९१ । इति यत् ।) विषेण यो वध्यः । इत्यमरः ॥ (विषेण क्रीतः । विषाय हित इति वा । इत्यर्थे "उगवादिभ्यो यत् ।" ५ । १ । २ । इति यत् ॥)

विष्वः, त्रि, हिंस्रः । इत्युणादिकोषः ॥

विष्वक्, व्य, परितः । सर्व्वतः । इत्यमरः ॥ (यथा, भागवते । ६ । ९ । १३ ।
"कृतान्त इव लोकानां युगान्तसमये यथा ।
विष्वग्विवर्द्धमानं तमिषुमात्रं दिने दिने ॥")

विष्वक्, क्ली, विषुवम् । इति शब्दरत्नावली ॥ विष्वं अञ्चति इत्यर्थे त्रिलिङ्गम् ॥ (यथा, भागवते । १ । ९ । ३४ ।
"युधि तुरगरजोविधूम्रविष्वक्-
कचलुलितश्रमवार्य्यलङ्कृतास्ये ॥")

विष्वक्सेनः, पुं, विष्णुः । इत्यमरः ॥ (यथा, शिशुपालवधे । १० । ५५ ।
"साम्यमाप कमलासखविष्वक्-
सेनसेवितयुगान्तपयोधेः ॥")
विष्णोर्निर्म्माल्यधारी । यथा,—
"निर्म्माल्यधारी विष्णोस्तु विष्वक्सेनश्चतुर्भुजः ।
शङ्खचक्रगदापाणिर्दीर्घश्मश्रुर्जटाधरः ॥
रक्तपिङ्गलवर्णस्तु सितपद्मोपरिस्थितः ।